श्रीगणेशप्रातःस्मरणम्

{॥ श्रीगणेशप्रातःस्मरणम् ॥}

प्रातः स्मरामि गणनाथमनाथबन्धुं

सिन्दूरपूरपरिशोभितगण्डयुग्मम् ।

उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-

माखण्डलादिसुरनायकवृन्दवन्द्यम् ॥ १॥

प्रातर्नमामि चतुराननवन्द्यमान-

मिच्छानुकूलमखिलं च वरं ददानम् ।

तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं

पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २॥

प्रातर्भजाम्यभयदं खलु भक्तशोक-

दावानलं गणविभुं वरकुञ्जरास्यम् ।

अज्ञानकाननविनाशनहव्यवाह-

मुत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३॥

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।

प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥ ४॥

॥ इति श्रीगणेशप्रातःस्मरणम् ॥

Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ट्oday

http://sanskritdocuments.org

Ganesha Pratah Smarana Stotram Lyrics in Devanagari PDF
% File name : ganeshapratahsmarana.itx
% Category : suprabhAta
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : hinduism
% Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)
% Proofread by : Sunder Hattangadi (sunderh at hotmail.com)
% Latest update : Apr. 27, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website